प्रलम्बगलकम्बलाम्” नीलकण्ठः “दृतिकण्ठमनड्वाहं सर्वरत्नैरलङ्कृतम्” तत्रैवाध्याये। ५मेघे निघण्टुः ६सत्र-विशेषकारके यजमानभेदे दृतिवातवतोरयनशब्दे दृश्यम्।

**दृतिधारक** दृतिं दृत्याकारं धारयति धारि–ण्वुल् ६त०। (आकनपाता) ख्याते वृक्षे शब्दच०।

**दृतिवातवतोरयन** न०अलुक् स०। सत्रभेदे “दृतिवातवतोरयनमेकैकेन पृष्ठ्यस्तोमेन मासं मासम्” कात्या०श्रौ०२४।२४।१६ “दृतिवातवतोरयनमिति सत्रस्य संज्ञा” कर्कः। ताण्ड्यब्रा०२५।३। १वाक्यादौ अस्य विवृतिः। “अथ दृतिवातवतोरयनमाह भा० “अतिरात्रस्त्रिवृता मासं, पञ्चदशेन मासं, सप्तदशेन मासमेकविंशेन मासं, त्रिणवेन मासं, त्रयस्त्रिंशेन मासं, महाव्रतं, त्रयस्त्रिंशेन मासं, त्रिणवेन मासमेकविंशेन मासं, सप्तदशेन मासं, पञ्चदशेन मासं, त्रिवृता मासमतिरात्रः”। १“प्रथमं प्रायणीयोऽतिरात्रस्ततस्त्रिवृदादित्रयस्त्रिंशान्ताः आदितः षण्मासा आम्नव्याः विषुवतः स्थाने महाव्रतं भवति तत एव त्रिवृदादिमासा उत्तरस्मिन् पक्षसि द्वादशादिसप्तमासान्ताः षण्मासाः स्युः तत उदयनीयमहः एतानि त्रिषष्ट्युत्तरशतत्रयमहानि स्युः अधिकयोर्द्वयोरह्नोः व्यवस्थाविषये सूत्रकारः दृतिवातवतोरयने द्वावेकोनौ मासौ स्तुतयुक्त्रिवृतावितिगौतमस्त्रयस्त्रिंशावितिधानञ्जय्यः उभौ वा त्रिंशिनौ स्यातां यथैतद्ब्राह्मणमिति त्रयस्त्रिंशावेकोनाविति कल्पकारस्य मतम्। अथैतदयनं कर्तृद्वारा प्रशंसति” भा०। “एतद्वै दृतिवातवन्तौ खाण्डव उपेतो विषुवति वातवानुत्तिष्ठति, समापयति दृतिस्तस्माद्दानीयांसो वातवता भूयांसो दार्त्तेयाः” ६“एतत् सत्रायणं दृतिश्च वातवांश्चेत्युभौ यजमानौ खाण्डवे वने उपेतः अन्वतिष्ठतामित्यर्थः भूतकाले व्यत्ययेन वर्त्तमानप्रत्ययः एवमुत्तरयोरप्याख्यातयोर्द्रष्टव्यं तयोरनुष्ठानप्रयुक्तं किञ्चित् फलवैषम्यं वक्तुमाह वातवान् विषुवति महाव्रते सम्पूर्णे उत्तिष्ठति उत्तिष्ठन् सत्रं समापितवान् दृतिस्तु द्वादशापि मासानास्थाय समापयन् यस्मादेवं तस्माद्दानवता वातवतोवंश्यास्तनीयांसः अत्यर्थं तनवः कृशा अभवन् दार्त्तेया दृतिवंश्यास्तु भूयांसो, बहुकर्तृकत्वानुष्ठानं प्रशस्तफलवदित्युक्तं भवति। अत्र विवृतिभिः क्रमम् इति वातवतोरयनमात्रिणवेभ्यस्त्रिवृद्भ्य उद्धरत्युक्थानि पञ्चदशेभ्यः षोडशिनमित्यादिकं द्रष्टव्यम्”।

**दृतिहरि** पु० दृतिं चर्ममयं द्रव्यं हरति दृतौ+उपपदे हृ–पशौ कर्त्तरि इन्। कुक्कुरे उज्ज्व०। पशोरन्यत्र अण् दृतिहार चर्महारके।

**दृत्य** त्रि० दृ–कर्मणि क्यप्। १आदरणीये भावे क्यप्। २आदरे न० आङि आदृत्य तत्रार्थे “आदृत्यस्तेन दृत्येन” भट्टिः।

**दृध्र** न० गवां निर्गमनद्वाररोधके “ते गव्यता मनसा दृध्रमुब्धम्” ऋ० ४।१।१५ भाष्ये माधवः।

**दृन्** अव्य० १हिंसायाम् सि०कौ०। २दृढार्थे शब्दार्थचि०।

**दृन्फ** क्लेशे तु०प० अक०सेट्। दृफति दृम्फति अदृम्फीत्। क्लेशने सक०। दृन्फूः सर्पजातिः

**दृन्फू** स्त्री दृन्फ–कू नि० न नलोपः। १सर्पजातौ २वज्रे च मेदि० दृन्भू तत्रार्थे सि०कौ०।

**दृन्भू** पु० दृन् हिंसायां भवति भुवः क्विप्। १वज्रे २सूर्ये हेमच०। ३नृपे शब्दच० ४अन्तके संक्षिप्तसार “दृन्कर पुनःपूर्वस्य भुवो यण् वक्तव्यः” वार्ति० अजादौ यण्। दृन्भ्वौ दृन्भ्व इत्यादि दृम्भू तत्रार्थे सि०कौ० [कन्दर्पः

**दृप** बाधने तु० पर० सक० सेट्। दृपति अदर्पीत्। ददर्प।

**दृप** सन्दीपने वा चुरा०उभ०पक्षे भ्वा०पर०सक०सेट्। दर्पयति ते दर्पति। अदीदृपत्-त अददर्पत्-त अदर्पीत्।

**दृप** हर्षे गर्वे च अक०दिवा०वेट् दृप्यति “दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखोपमाम्” गीतगो० इरित् अदृपत् अद्राप्सीत् अदर्पीत् केचिदिमं ऊदितं मन्यन्ते दर्पिष्यति द्रप्स्यति अस्य रधादित्वात् वेट्कत्वम्। तेन रूपे न वैलक्षण्यम् दर्पः दृप्तः। ऊदित् दृप्तः। शब्दस्तोमे ऊदित्त्वोक्तिः मतभेदेन।

**दृप्त** त्रि० दृप–गर्वे हर्षे च वर्त्तमाने क्त। १गर्वान्विते २हर्षान्विते च ३विष्णौ पु० “दर्पहो दर्पदो दृप्तो दुर्द्धरोऽथापराजितः” विष्णुसं० “दृप्तबालाकिर्हानूचानो गार्ग्य आस” शत०ब्रा० १४।५।१।१

**दृप्र** त्रि० दृप–बाधने रक्। बलयुक्ते उणादि०।

**दृफ** क्लेशे तुदा० मुचादि० अक०पर० सेट्। दृम्फति अदर्फीत् क्लेशने सक०। राजा चौरं दृम्फति क्लिश्नातीत्यर्थः।

**दृब्ध** त्रि०दृभ–ग्रन्थने कर्मणि क्त। १ग्रथिते त्रि०अमरः। दृभ–भये कर्त्तरि क्त। २भीते भावे क्त। ४ग्रथने ५भये च न०

**दृभ** ग्रथने वा चुरा०उभ०पक्षे तु०पर०सक०सेट्। दर्भयति ते दृभति अदीदृभत्-त अददर्भत् त अदर्भीत्। ईदित्। दृब्धः दृब्धवान्। दर्भः